E-ISSN-2584-2870

देवभूमि-सौरभम्
Devabhūmisaurabham

Vol 1 Issue 2 July-Dec 2024 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

## सादृश्यमूलकालङ्कारयोरुपमारूपकयो: शाब्दबोधमीमांसा कुवलयानन्ददिशा विमर्शश्च

**देवाङ्ग: उदयभाई भट्ट:**
शोधच्छात्र:
गुजरात-युनिवर्सिटी, भाषासाहित्यभवनम्,
संस्कृतविभाग:, अहमदाबाद:, गुजरातम्
Mail id- devangbhattp@gmail.com

Mo.No.-**8619087683**

---

◆ **कूटशब्दा: (Key Words) -** उपमा, रूपकम्, अलङ्कार:, उपमानम्, उपमेयम्, सादृश्यम्, अभेद:, ताद्रूप्यम्, अवच्छेदकावच्छिन्न:, निरूपितत्वम्, विषयता, विशेष्यता, प्रकारता।

◆ **शोधसारांश: (Abstract) -**

काव्ये अलङ्काराणां महत्त्वम् अतिप्राचीनकालाद् एव विलोक्यते किन्तु अलङ्कारविषये सूक्ष्मं चिन्तनं कदा आरब्धम् इति निश्चितरूपेण वक्तुं न शक्यते। निरुक्तादिवैदिकवाङ्मयस्य विलोकनाद् अस्य विषयस्य पुरातनत्वं निर्विवादम्। आचार्यभरताद् आरभ्य अद्यावधि अलङ्कारविषये व्यापकं गभीरञ्च चिन्तनं सततं विधीयमानम् अवलोक्यते।

यद्यपि मम्मटाचार्यैः काव्येषु अलङ्काराणाम् अनिवार्यता न स्वीकृता किन्तु चन्द्रालोके जयदेवेन तल्लक्षणम् आलोचयता स्पष्टशब्दै: अलङ्काराणाम् अनिवार्यत्वम् उद्घोषितम्—

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मादनुष्णमनलं कृती॥**[1]

कुवलयानन्दाख्यालङ्कारग्रन्थे शताधिका अर्थालङ्कारा: वर्णिता: सन्ति , तेषु अन्यतमयो: सादृश्यमूलकयो: द्वयो: उपमारूपकयो: कुवलयानन्ददिशा विवेचनं कृतम्। एवञ्च द्वयोर्मध्ये किम् अस्ति वैलक्षण्यम् इत्यपि विवेचितम्। अथ च पण्डितराजजगन्नाथस्य मतं विलोक्य उपमारूपकयो: शाब्दबोधमीमांसापि विहिता अस्ति। 'अरविन्दसुन्दरं मुखम्' इत्यत्र उपमालङ्कारो भवति। अत्र सादृश्यस्य पदार्थान्तरत्वे स्वीकृते सति बोध: कथमिति विवेचितम्। एवं 'मुखं चन्द्र:' इत्यत्र रूपकालङ्कारो भवति। इहापि कथं भवति शाब्दबोध: इति विवेचितम्। अथ च श्रीमदप्पयदीक्षितविरचितकुवलयानन्ददिशा उपमालङ्कारस्य रूपकालङ्कारस्य च लक्षणोदाहरणदीनां विहितो विमर्श:। एवञ्च द्वयोर्मध्ये किमस्ति वैलक्षण्यं तथा च उपमातो रूपकस्य कथं भेद इत्यपि विवेचितम्।

## ◆ लेख: (Full Paper)

अलंकारा: शब्दालङ्कारत्वेनार्थालङ्कारत्वेनोभयालङ्कारत्वेन च त्रैविध्यं धारयन्ति। तत्रार्थालङ्कारेषु सादृश्यमूलका: विरोधमूलका: शृङ्खलाबद्धाः तर्कन्यायमूलकाः वाक्यन्यायमूलकाः लोकन्यायमूलकाः गूढार्थप्रतीतिमूलकाः संश्लेषमूलकाश्च अलङ्कारा: विद्यन्ते। तदानीं सादृश्यमूलकालङ्कारा: कीदृशा इति जिज्ञासायां येषामलङ्काराणां मूले द्वयोरुपमानोपमेययो: सादृश्यमस्ति तेऽलङ्कारा: सादृश्यमूलका:। तत्र सादृश्यमूलकालङ्कारणामपि भेदाभेदप्रधानत्वेनाभेदप्रधानत्वेन गम्यौपम्याश्रयत्वेन च विभाजनमस्ति। तत्रोपमाया: परिगणनं भेदाभेदप्रधानालङ्कारेषु भवति। भेदाभेदप्रधानालङ्काराः उपमोपमेयोपमानन्वयस्मृतिमन्त: सन्ति। तत्र भेदाभेदयो: साम्ये भवत्युपमा। तद्यथा कुवलयानन्दे :-

### ■ उपमालङ्कारः -

---

[1] चन्द्रालोक:-१/८

**उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।**

**हंसीव कृष्ण ते कीर्तिस्स्वर्गङ्गामवगाहते॥** [2]

यत्रोपमानमेययो: सहृदयहृदयाह्लादितया चारुसादृश्यमद्भूततयोल्लसति व्यङ्ग्यमर्यादां विना स्पष्टं प्रकाशते तत्रोपमालङ्कार: । इदानीं लक्षणे उपमानोपमेयत्वस्याकथने सति यस्मिन् काव्ये द्वयो: पदार्थयो: सादृश्यं कथ्यते तत्रोपमा भवतीति लक्षणे सति " ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम् " इत्यादावुपमालङ्कारापत्तिर्जायते , तस्मिन्पद्ये काव्यशशिनोरर्थरश्मीनां च सहृदयमनोरञ्जकत्वादिधर्मसाम्येन सादृश्यप्रतीतेः । अत एव अप्पयदीक्षितेनोपमानोपमेययोरित्युक्तम्। न च काव्यशशिनोरुपमानोपमेयत्वयोग्यतास्ति । अतो नोक्तदोषः । गोसदृशो गवय इत्यादौ गोगवययो-स्तथाभावेऽपि नोपमालङ्कार इति तत्रातिव्याप्तिपरिहाराय सहृदयहृदयाह्लादितयेति विशेषणं प्रदत्तमस्ति । एवञ्चोपमा व्यञ्जनयावगम्यते चेद्ध्वनिविषय: भवति नालङ्कार इत्यर्थं व्यङ्ग्यमर्यादां विना स्पष्टं प्रकाशते तत्रोपमेत्युक्तम्।

एवं कृते सतीदानीमुपमानोपमेयत्वयोग्यताशालिनोः सहृदयहृदयसम्मदाधायित्वे सति अव्यङ्ग्यसादृश्यम् उपमालङ्कार इति लक्षणम्। यथा -

◆ **" हंसीव कृष्ण ते कीर्तिस्स्वर्गङ्गामवगाहते॥ "**

अस्यार्थो भवति - हे कृष्ण ! तव कीर्ति: हंसी इव स्वर्गगङ्गामवगाहत इति।

इत्यादावुपमेयमस्ति कीर्ति:, उपमानमस्ति हंसी, साधर्म्यं स्वर्गगङ्गावगाहनत्वरूप:, वाचकशब्द: इवेति। उपमीयत इत्युपमानम् ,उपमातुं योग्यमुपमेयम् , समान: धर्म: सधर्म: तस्य भाव: साधर्म्यमिति। उपमायामस्त्यावश्यकतत्त्वान्युपमानोपमेयसाधारणधर्मवाचकशब्दा:। ते सर्वे सन्त्युपरोक्तोदाहरणे तस्मादत्र पूर्णोपमा ज्ञातव्या । अत्र उपमानोपमेययो: भिन्नसत्तात्वात् भेद:, द्वयोर्मध्ये स्थितस्य स्वर्गगङ्गावगाहनत्वरूपस्य धर्मस्य समानत्वाद् अभेद इति कृत्वाऽयमलङ्कार: भेदाभेदप्रधान:।

**उपमालङ्कारस्य शाब्दबोधो विवेच्यते |**

उपमालङ्कार: सादृश्यमूलकालङ्कारो विद्यते | सादृश्यं नाम तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् | पण्डितराजजगन्नाथस्य मतानुसारं सादृश्यस्य पदार्थान्तरत्वे सति “अरविन्दसुन्दरं मुखम्” इत्यत्र विचार्यते शाब्दबोध: | अत्र अरविन्दपदार्थः कमलम्, सुन्दरपदार्थः सौन्दर्यवान्, मुखपदार्थ: मुखम् | निपातातिरिक्तयो: नामार्थयोरभेदान्वयः अत: अरविन्दपदस्य लक्षणा कर्त्तव्या | लक्षणया अरविन्दनिरूपितसादृश्यप्रयोजकमित्यर्थो लक्ष्यते । तस्य सुन्दरपदार्थैकदेशे सौन्दर्ये अभेदसम्बन्धेनान्वयो भवति । तच्च सुन्दरपदार्थे स्वरूपसम्बन्धेनान्वेति | तच्च मुखपदार्थे अभेदसम्बन्धेनान्वेति । तेन “अरविन्दसुन्दरं मुखम्” इत्यस्य वाक्यस्य अरविन्दनिरूपितसादृश्यप्रयोजकाभिन्नसौन्दर्यवदभिन्नं मुखमित्याकारको बोधो भवति | अरविन्दपदार्थस्य सादृश्ये निरूपितत्वसम्बन्धेनान्वये कृते अरविन्दनिरूपितसादृश्यमिति भवति । अरविन्दे प्रकारता तथा सादृश्ये विशेष्यता भवति । अरविन्दनिष्ठ-निरूपितत्वसम्बन्धावच्छिन्नप्रकारतानिरूपिता सादृश्यनिष्ठा विशेष्यता तत्समानाधिकरणनिरूपितत्वसम्बन्धावच्छिन्न-प्रकारतानिरूपितप्रयोजकत्वनिष्ठा विशेष्यता तत्समानाधिकरणस्वरूपसम्बन्धावच्छिन्नप्रकारतानिरूपितप्रयोजकनिष्ठा विशेष्यता तत्समानाधिकरणाभेदसम्बन्धाव-च्छिन्नप्रकारतानिरूपितसौन्दर्यनिष्ठा विशेष्यता तत्समानधिकरणस्वरूपसम्बन्धावच्छिन्नप्रकारतानिरूपितसुन्दरनिष्ठा विशेष्यता,तत्समानाधिकरणाभेदसम्बन्धावच्छिन्नप्रकारतानिरूपितमुखनिष्ठविशेष्यताकशाब्दबोधः।

■ **रूपकालङ्कारः** –

अथ च सादृश्यमूलकाभेदप्रधानालङ्कारा आरोपाध्यवसायेन वर्गद्वये सन्ति विभक्ता: । तत्रारोपमूलका: रूपकपरिणामससन्देहोल्लेखापह्नुतिभ्रान्तिमन्त: वर्तन्ते तथा चाध्यवसायमूलके उत्प्रेक्षातिशयोक्ती वर्तेते। तत्राभेदप्रधान: सादृश्यमूलकालङ्कार: रूपकम्। तद्यथा कुवलयानन्दे -

**विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्।**
**रूपकं तत् त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः॥**
**अयं हि धूर्जटिस्साक्षाद्येन दग्धाः पुरः क्षणात्।**
**अयमास्ते बिना शम्भुस्तार्तीयीकं विलोचनम्॥**
**शम्भुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम्।**
**अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना ?॥**
**साध्वीयमपरा लक्ष्मीरसुधासागरोदिता।**
**अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते॥** [3]

विषयि- उपमानभूतं पद्मादि। विषय:- तदुपमेयभूतं वर्णनीयं मुखादि। विषयिणो रूपेण विषयस्य रञ्जनं रूपकम्, अन्यरूपेण रूपवत्त्वकरणात्। तच्च क्वचित्प्रसिद्धविषय्यभेदे पर्यवसितम्। क्वचिद्भेदे प्रतीयमान एव तदीयधर्मारोपमात्रे पर्यवसितम्।

---

[2] कुवलयानन्द:-५

[3] कुवलयानन्द:-१६ त: १९

विषयिण: - उपमानस्य ये अभेदताद्रूप्ये तयोः रञ्जनमिति तद्द्वन्द्वगर्भषष्ठीतत्पुरुषः । षष्ठ्यर्थश्च सम्बन्धो विषयिता । तथा च विषय्यभेदताद्रूप्यान्यतरविषयिताकबोधविषयत्वं यत् विषयस्य तद्रूपकम् । रञ्जनविषयीभूतविषय्यभेदताद्रूप्यान्यतरद्रूपकमिति यावत्।

रूपकशब्दस्य व्युत्पत्तिस्तावत् :- रूप्यते-इतरव्यावृत्ततया ज्ञाप्यते धर्मी अनेन इति रूपम् , तद्रूपमस्य असाविति - तद्रूपः, तस्य भावः ताद्रूप्यम्- चन्द्रकार्यकारित्वाद् विषयिणः- उपमानस्य अभेदताद्रूप्याभ्याम् , विषयस्य-उपमेयस्य, यद् रञ्जनमिव रञ्जनम् स्वोपरक्तबुद्धिविषयीकरणमिति यावत्, तद्रूपकमित्यर्थः । उक्तं हि अलङ्कारचन्द्रिकायाम् -

**'उपात्तबिम्बाविशिष्टविषयधर्मिकाहार्यारोपनिश्चयविषयीभूतम् उपमानाभेदताद्रूप्यान्यतरद् रूपकम् ।** [4]

तद्रूपकमस्ति द्विविधम् - अभेदरूपकं ताद्रूप्यरूपकं चेति । द्विविधमपि प्रत्येकं त्रिविधम् - प्रसिद्धविषय्याधिक्यवर्णनेन तन्न्यूनत्ववर्णनेन अनुभयोक्त्या च । एवं प्रकारेण रूपकं भवति षड्विधम् । यथा -

**"अयं हि धूर्जटिस्साक्षाद्येन दग्धाः पुरः क्षणात् ।"**

अस्यार्थो भवति – अयं - पुरोदृष्टः, साक्षात् - स्वयमेव, हि - निश्चयेन , धूर्जटिः - शिवः , येन पुरः - नगराणि, क्षणात् - किञ्चित्कालेनैव , दग्धाः - भस्मीकृताः ।

अत्र 'येन दग्धा' इति विशेषणेन वर्णनीये राज्ञि प्रसिद्धेन शिवेनाभेदानुरञ्जनात् ,तथा च शिवस्य पूर्वावस्थातो वर्णनीयायां राजभावावस्थायां न्यूनत्वाधिक्ययोरवर्णनाच्च अनुभयाभेदरूपकमाद्यम्।

**"अयमास्ते बिना शम्भुस्तार्तीयीकं विलोचनम् ।।"**

अस्यार्थो भवति – अयं - पुरोदृष्टः, विना तार्तीयीकं - तृतीयम् , विलोचनं - विशिष्टलोचनम् , शम्भुः - शिवः, आस्ते - वर्तते ।

अत्र तृतीयलोचनप्रहाणोक्त्या शिवस्य पूर्वावस्थातो वर्णनीयायां राजभावावस्थायां न्यूनताप्रदर्शनान्न्यूनाभेदरूपकं द्वितीयम् ।

**"शम्भुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम् ।"**

अस्यार्थो भवति – समदृष्टितां - युग्मलोचनम् , स्वीकृत्य - ग्राह्य , शम्भुः - शिवः , अद्य विश्वं - संसारम् , अवति - रक्षति ।

अत्र विषमदृष्टित्वपरित्यागेन जगद्रक्षकत्वोक्त्या शिवस्य पूर्वावस्थातो वर्णनीयायां राजभावावस्थायां उत्कर्षविभावनादधिकाभेदरूपकं तृतीयमिति ।

**"अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना ?।।"**

अस्यार्थो भवति - अस्याः - नायिकायाः, मुखेन्दुना- वदनचन्द्रेण, नेत्रानन्दे- नेत्रयोः आनन्दः नेत्रानन्दः तस्मिन् नेत्रानन्दे , लब्धे सति-प्राप्ते सति , किमिन्दुना -आकाशस्थचन्द्रेण किं प्रयोजनमिति ।

अत्र प्रसिद्धस्येन्दोः कैमर्थ्यवर्णनेन मुखेन्दोस्ततो भेदप्रतीतेः । तेन इन्दुगतसाधारणधर्मस्य इन्दुत्वस्य मुखे उपरञ्जनमात्रम्। प्रसिद्धचन्द्रात् न्यूनत्वाधिक्योरवर्णनाच्चानुभयताद्रूप्यरूपकमाद्यम् ।

**"साध्वीयमपरा लक्ष्मीरसुधासागरोदिता ।"**

अस्यार्थो भवति - इयं-सन्निकृष्टा, साध्वी- सुन्दरी, अपरा-अन्या, असुधासागरोदिता- अनमृतसमुद्रोत्पन्ना, लक्ष्मी-देवी ।

अत्रेयमिति काञ्चन नायिकां निर्दिश्य, अपरलक्ष्मीत्वस्योक्त्या श्रुतिस्मृतिपुराणप्रसिद्धा या देवी लक्ष्मी वर्तते ततो भेदाविष्करणात् सुधासागरोदितत्ववैकल्याच्च न्यूनताद्रूप्यरूपकम्।

**"अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते ।।"**

अस्यार्थो भवति - अयं-पुरोदृष्टः, मुखचन्द्रः-आननेन्दुः, कलङ्किनः-कलङ्कयुक्तात् , चन्द्रात्-इन्दुनः, अतिरिच्यते-अधिकमस्ति सुन्दरमिति ।

अत्र प्रसिद्धचन्द्रस्य कलङ्कित्वविशेषणेन मुखचन्द्रे कलङ्कवैधुर्यप्रतीत्या आधिक्यवर्णनात् अधिकताद्रूप्यरूपकमिति ।

**रूपकालङ्कारस्य शाब्दबोधः**

रूपकालङ्कारः सादृश्यमूलकाभेदप्रधानः वर्तते |

---

[4] अलङ्कारचन्द्रिका – पृष्ठसंख्या-१५

**उपमेयतावच्छेदकपुरस्कारेणोपमेये शब्दान्निश्चीयमानमुपमानतादात्म्यं रूपकम् । तदेवोपस्कारकत्व-विशिष्टमलङ्कारः ।** [5]

पुरस्कारश्च उपमेयतावच्छेदकावच्छिन्ने उपमानतादात्म्यस्य वर्णनं , न तु इदन्त्वावच्छिन्ने सुन्दरत्वावच्छिन्ने मुखे चन्द्रतादात्म्यम्, अपि तु मुखत्वावच्छिन्ने मुखे चन्द्रतादात्म्यम् । उपमेयतावच्छेदकावच्छिन्नविषयतेति यावत् । सा च विषयता क्वचित् प्रकारतारूपा, क्वचित्तु विशेष्यतारूपा । सा च विषयता शाब्दबोधीया ग्राह्या, न तु प्रत्यक्षादेरित्यत्र तात्पर्यग्राहकशब्दादिति । शाब्दबोधश्च निश्चयस्वरूपो ग्राह्यः, न तु सम्भावनात्मकः। सम्भावना अर्थात् अप्रामाण्यशङ्काकवलितं ज्ञानम् ।

एवञ्च शाब्दबोधे अप्रामाण्यशङ्काऽनास्कन्दितत्वं विशेषणं देयमित्यत्र तात्पर्यं सूचयति निश्चीयमानपदम् । लक्षणञ्च अप्रामाण्यशङ्काऽनास्कन्दित- शाब्दबोधीय उपमेयतावच्छेदकावच्छिन्नविषयताविशिष्टा या विषयता तदाश्रयस्तादात्म्यं रूपकम् । “मुखं चन्द्रः” इत्यत्र उपमेयतावच्छेदकावच्छिन्ने मुखे चन्द्रस्तादात्म्येन विशेषणं भवति । तत्र वैशिष्ट्यञ्च स्वनिरूपितत्वस्वनिरूपितोपमानतावच्छेदकावच्छिन्नविषयतानिरूपितत्वाभ्यां सम्बन्धाभ्यां विद्यते । तादात्म्यनिष्ठा संसर्गता नाम्नी या विषयता सा विषयता मुखत्वावच्छिन्नविशेष्यतया तथा च चन्द्रत्वावच्छिन्नप्रकारतया च निरूपिता भवतीति लक्षणसमन्वयः ।

उपमारूपकालङ्कारौ वस्तुत: सादृश्यमूलकौ वर्तेते । सादृश्यं द्विविधं भवति - भेदघटितम् अभेदघटितं चेति ।

भेदघटितं सादृश्यं भेदेन विशिष्टं भवति । अभेदेन घटितं तु अभेदेन विशिष्टं भवति । तत्र भेदघटितं सादृश्यम् उपमाया: जीवातु: । उपमा तत्र भवति यत्र भेदघटितं सादृश्यं भवति । यथा 'चन्द्रसदृशं मुखम्' इत्यत्र चन्द्रभिन्नं चन्द्रसदृशाऽभिन्नं चेति बोधो भवति । रूपकस्य प्रयोजकम् अभेदघटितं सादृश्यं भवति । तेन 'मुखं चन्द्र:' इत्यत्र चन्द्राऽभिन्नं चन्द्रसदृशं च मुखमिति बोधो जायते । एवं सादृश्यस्य द्वैविध्येन उपमारूपकयो: भेदः स्फुट एव ।

## ■ सन्दर्भग्रन्थसूची (Bibliography)


**कुवलयानन्द:** - ‘अलङ्कारसुरभि’हिन्दीव्याखोपेतः । चौखम्बा विद्याभवनम् । वाराणसी । चतुर्थसंस्क्करणम्-१९८३

**चन्द्रालोक:** - शरदागमटेएकासहितः । चौखम्बा संस्कृतभवनम् । वाराणसी । नवमसंस्करणम्-२०१३

**अलङ्कारचन्द्रिका** – द्वितीयसंस्करणम् । चक्रवर्ती श्यामपादः । Book Source-Digital Library of India Item 2015.357018. २०१७

**रसगङ्गाधर:** - (गुरुमर्मप्रकाशटीकासहितः) सम्पादकः-आचार्यश्रीपारसनाथद्विवेदी । सरस्वतीभवन-ग्रन्थमाला । सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी । २०००


[5] रसगङ्गाधरः-द्वितीयाननम्